## दिनाङ्क :- 16.05.2026

## प्रात: - 06:55

### संस्कृत वार्ता:

### अथ वार्ताः

**प्रधानमन्त्री-नीदरलैंड्स भ्रमणम्**

प्रधानमन्त्री नरेन्द्रमोदी संयुक्त-अरब्-अमिरात्-देशस्य अल्पकालावधिकां यात्रां संपूर्य यूरोप-देशैः सह भारतस्य सामरिक-आर्थिक-सम्बन्धान् प्रगाढतरं कर्तुं पञ्चराष्ट्राणां भ्रमणस्य द्वितीये चरणे गतरात्रौ नीदर्लैण्ड्-देशं प्राप्तवान्। एम्स्टर्डम् इति विमानस्थानके डच्-देशस्य विदेशमन्त्रिणा टाम् बेरेण्ड्सन् इत्यनेन श्रीमोदिनः स्वागतम् कृतम्। इतः पूर्वं सः आबुधाबी-नगरे यू.ए.ई.-देशस्य राष्ट्रपतिना मोहम्मद्-बिन्-जायद्-अल्-नह्यान् इत्यनेन सह चर्चां कृतवान्। हेग्-नगरे भारतीय-प्रवासिनः सांस्कृतिक-सङ्गीत-प्रदर्शनैः प्रधानमन्त्रिणः भव्यतया स्वागतं कृतवन्तः। डच्-सैनिकाः अपि तं औपचारिकरूपेण अभिनन्दितवन्तः। भ्रमणावधौ प्रधानमन्त्री मोदी डच्-देशस्य प्रधानमन्त्रिणा रोब् जेट्टन् इत्यनेन सह द्विपाक्षिकं वार्तालापं करिष्यति, राष्ट्रप्रमुखाञ्च मिलिष्यति।

**पीएम-मीडिया-संस्थायाः प्रतिवेदनं निराकृतवान्**

प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तम् अस्ति यत् देशवासिनां कृते 'ईज़् आफ़् डूयिङ्ग् बिजनेस्' अथ 'ईज़् आफ़् लिविङ्ग्' इत्येतयोः परिष्कारे सर्वकारः प्रतिबद्धः अस्तीति। एकस्मिन् सामाजिक-प्रसारमाध्यमे, श्रीमोदी प्रसार-संस्थानां प्रतिवेदनं निराकृतवान् यत् जनानामुपरि कथमपि अधिभारम् आरोप्यते इति।

## शासकीय-इन्धन-विशेषाधिभारः

सर्वकारेण पेट्रोल्-निर्याते त्रि- रूप्यकाणां प्रति-लीटर इति विशेष-अतिरिक्त-उत्पादशुल्कं आरोपितम् अस्ति। वित्तमन्त्रालयेन अद्य प्रकाशिते आधिकारिक-राजपत्रे उक्तमस्ति यत् अधिसूचनानुगुणं डीज़ल्-निर्याते प्रति-लीटरेति परिमितौ विशेष-अतिरिक्त-उत्पादशुल्कं त्रयोविंशतिः रूप्यकाणां अपेक्षया सार्धषोडश-रूप्यकाणि कृत्वा न्यूनीकृतमस्ति।

## उपराष्ट्रपतिनः सिक्किम-भ्रमणम्

उपराष्ट्रपतिः सी. पी. राधाकृष्णन् वर्यः कार्यभारग्रहणानन्तरं अद्य सिक्किम्-राज्यस्य प्रथमवारं भ्रमणं करिष्यति। स्वयात्रायाम् उपराष्ट्रपतिः गङ्गटोक्-नगरे सिक्किम्-राज्यस्य राज्यत्व-दिवस-समारोहे भागं ग्रहीष्यति। राज्यपालः ओम् प्रकाश् माथुरः, सिक्किम्-राज्यस्य मुख्यमन्त्री प्रेम् सिङ्घ् तमाङ्गः, केन्द्रीय-पूर्वोत्तर-क्षेत्र-विकास-मन्त्री ज्योतिरादित्यसिन्धिया इत्यादयोऽपि उत्सवेऽस्मिन् भागं ग्रहीष्यन्ति।

## सी. बी. एस्. ई.- परिणामानन्तर सुविधाः

केन्द्रीय-माध्यमिक-शिक्षा-बोर्ड् सी. बी. एस्. ई. इत्ययम् अवदत् यत् ये छात्राः स्वस्य परिणामैः असन्तुष्टाः सन्ति ते संरचित-समीक्षा-व्यवस्थां प्राप्तुं शक्नुवन्ति या हि द्वि-चरणीय-समीक्षा प्रक्रिया अस्ति। प्रथमचरणे छात्राः स्वमूल्यांकितानां उत्तरपुस्तिकानां स्कैन इति प्रतिविम्बित-प्रतयः याचयितुं शक्नुवन्ति। एताः अन्तर्जालीय-माध्यमेन उपलभ्यन्ते। द्वितीयचरणे छात्राः विसङ्गतानां प्रश्नोत्तराणां सत्यापनाय आवेदनं कर्तुं शक्नुवन्ति उतो वा अङ्कन-योजनायाः आधारेण विशिष्टानां उत्तराणां पुनर्मूल्याङ्कनार्थं याचनां कर्तुं शक्नुवन्ति।

सी.बी.एस्.ई. इत्यनेन सूचितं यत् छात्राः अस्य मासस्य नवदश दिनाङ्कात् द्वाविंशतिः दिनाङ्कपर्यन्तं प्रतिविषयाय सप्तशतरूप्यकाणां शुल्केन मूल्यांकितानां

उत्तरपुस्तकानां प्रतिविम्बितप्रतिलिपिं प्राप्तुं अन्तर्जालीय-माध्यमेन आवेदनं कर्तुं शक्नुवन्ति।

## इस्रायल लेबनानयोः युद्धः

इस्रेल-लेबनान्-देशौ वाशिङ्ग्टन्-नगरे सञ्जातायाः वार्तायाः अनन्तरं युद्धविरामस्य पुनः पञ्चचत्वारिंशद् दिवसपर्यन्तस्य विस्ताराय सहमतौ अभवताम् इति अमेरिकादेशस्य विदेशविभागः अवदत्। विदेशविभागस्य प्रवक्ता टामी पिगोट् अवदत् यत्, वारद्वयकृत-वार्तालापेन □लदायकं युद्धविरामम् आगच्छदिति। इतः अनन्तरं जून्-मासस्य द्वित्रि दिनाङ्कयोः अधिक्येन वार्तालापो भविष्यतीति निश्चितमस्ति।

## आई. पी. एल. क्रिकेटक्रीडा

आई. पी. एल. क्रिकेटक्रीडायां गतरात्रौ लखनऊ-नगरस्य एकाना-क्रीडाङ्गणे लखनऊ-सूपर्-जायण्ट्स इति दलेन चेन्नै-सूपर्-किङ्ग्स् इति दलं सप्तस्तोभैः पराजितम्। सी.एस्.के. इत्यनेन प्रदत्तस्य अष्टाशीत्यधिकैकशतधावनाङ्कस्य लक्ष्यम् आतिथेयेन एल. एस. जीति दलेन सप्तदशैवक्षेपणचक्रेषु सम्प्राप्तम्।

यत्र केवलं अष्टत्रिंशत् कन्दुकेषु मिचेल मार्शस्य नवतिधावनाङ्कानां भूमिका निर्णायिका अभवत्। मार्शः उत्तमक्रीडकत्वेन पुरष्कृतः।

अद्यतनायां स्पर्धायां आतिथेय-कोलकाता-नाईट्-रायडर्स् इतीदं दलम् ईडन्-गार्डन्स् इत्यत्र गुजरात्-टायटन्स् इत्यनेन सह क्रीडिष्यति। क्रीडायाः आरम्भः सायं 07:30 वादने भविष्यति।

**।। इति वार्ता:।।**